# International Olympiad Foundation (IOF)
# (IOLYMPIADS LLP)

Certifying Talents Across World



Question Paper &
Answer Sheet
**CLASS-7**

IFSaO

International Foundation

Sanskrit Olympiad

# सप्तमीकक्ष्या-प्रश्नपत्रम्

⇒ प्रश्नपत्रं भागत्रये विभक्तम् अस्ति, तद्यथा- क) पठनबोधः (15), ख) व्याकरणम् (30) ग) विशिष्टप्रश्नाः (05) [HOTS]। प्रत्येकं भागान्तर्गते विभागे 5-5 प्रश्नाः सन्ति। प्रतिप्रश्नम् एकः-एकः अङ्कः भवति।

---

## क. पठनबोधः (Reading & Comprehension)

**हिमालयः**

भारतवर्षस्य उत्तरदिशायां हिमालयो नाम पर्वतोऽस्ति। अस्य पर्वतस्य शिखराणि अत्युन्नतानि सन्ति। एतानि शिखराणि सदैव हिमेन आच्छादितानि सन्ति। अत एव अस्य पर्वतस्य अभिधानं हिमस्य आलयः हिमालय इति प्रसिद्धोऽस्ति। हिमालयात् गंगा-यमुना-शतद्रु-विपाशा-इरावती-वितस्ता-प्रभृतयः अनेकाः नद्यः प्रादुर्भवन्ति। एतासां नदीनां जलं भारतवर्षस्य विशालं भूभागं सिञ्चति। अत एव अस्मिन् देशे प्रभूतानि विविधानि अन्नानि फलानि च उद्भवन्ति। अस्मिन् पर्वते विविधाः ओषधयः वृक्षाः धातवः विविधानि च रत्नानि उपलभ्यन्ते।

ग्रीष्मकाले तापेन व्याकुलाः जनाः हिमालयस्य पर्वतीयस्थलेषु गच्छन्ति सुखं च अनुभवन्ति। अस्मिन् एव पर्वते मानसरोवर-अमरनाथ-बद्रीनाथ-केदारनाथ-हरिद्वार-प्रभृतीनि अनेकानि दर्शनीयानि तीर्थस्थानानि अनेके च देवालयाः सन्ति। एतस्मिन् पर्वते स्थितासु अनेकासु गुहासु साधकाः तपश्चरन्ति। अत्र देवीनां मन्दिराणि अपि सन्ति। एतस्मात् कारणात् अयं पर्वतो देवभूमिरपि कथ्यते।

हिमेन आच्छादितानि अस्य उन्नतानि शिखराणि अतिशैत्यात् शत्रुभ्यश्च अस्मान् रक्षन्ति। अयं पर्वतः सुरक्षा-दृष्ट्या अतीव महत्वपूर्णोऽस्ति। अनेनैव कारणेन अस्माकं सुरक्षा-सैनिकाः अस्य रक्षायै तत्पराः भवन्ति।

**गद्यांशं पठित्वा 1–15 पर्यन्तं प्रश्नान् उत्तरत–**

1. कस्य देशस्योत्तरदिशि हिमालयो नाम नगोऽस्ति ?
   *A.* हिमालयस्य
   *B.* पर्वतस्य
   *C.* भारतस्य
   *D.* शिखरस्य
2. इरावती कुतः प्रादुर्भवति?
   *A.* हिमालयात्
   *B.* हिन्दमहासागरात्
   *C.* भारतात्
   *D.* गङ्गायाः
3. भारतभूमिं कासां नीरं सिञ्चति?
   *A.* तीर्थानाम्
   *B.* नदीनाम्
   *C.* सागराणाम्
   *D.* ओषधीनाम्
4. के सुखमनुभवन्ति?
   *A.* देवालयाः
   *B.* ओषधयः
   *C.* वृक्षाः
   *D.* जनाः

5. दर्शनीयानि तीर्थस्थानानि कुत्र सन्ति?

A. तीर्थस्थाने

B. हिमालये

C. जले

D. मन्दिरे

6. साधकाः कुत्र तपश्चरन्ति?

A. हरिद्वारे

B. मन्दिरेषु

C. गुहासु

D. शिखरेषु

7. हिमालयशिखराणि केन आच्छादितानि सन्ति?

A. वृक्षेण

B. नगेन

C. हिमेन

D. रत्नेन

8. 'प्रादुर्भवन्ति' क्रियायाः कर्त्र्यः काः सन्ति ?

A. विपाशा

B. नद्यः

C. यमुना

D. ओषधयः

9. 'शिखराणि' पदस्य विशेषणं किम् अस्ति?

A. आच्छादितानि

B. उन्नतानि

C. उभे

D. हिमेन

10. अत्र देवीनां मन्दिराणि अपि सन्ति।' वाक्ये कति अव्ययानि सन्ति?

A. एकम्

B. द्वे

C. त्रीणि

D. चत्वारि

11. गद्यांशे गिरिपदस्य कृते पर्यायपदं अस्ति?

A. देवालयः

B. मन्दिरम्

C. वृक्षः

D. पर्वतः

12. अन्तिमवाक्ये कर्तृकारकयुक्तानि कति पदानि सन्ति?

A. एकम्

B. द्वे

C. त्रीणि

D. चत्वारि

13. 'नद्यः' पदे का विभक्तिः?

A. प्रथमा

B. द्वितीया

C. षष्ठी

D. सप्तमी

14. 'उद्भवन्ति' पदे कः लकारः ?

*A.* लट्

*B.* लोट्

*C.* लङ्

*D.* लृट्

15. द्वितीयवाक्ये 'अस्य' पदं कस्मै प्रयुक्तम्?

*A.* हिमालयाय

*B.* शिखराय

*C.* भारतवर्षाय

*D.* हिमाय

## ख. व्याकरणम्

16. 'विद्वान्' शब्दस्य वर्णविन्यासे चतुर्थस्थाने वर्णः स्यात्-

*A.* इ

*B.* द्

*C.* व्

*D.* आ

17. 'स्+व्+आ+स्+थ्+य्+अ+म्' वर्णसंयोजने भवति-

*A.* स्वास्थम्

*B.* स्वास्थ्यम्

*C.* स्वासथ्यम्

*D.* स्वास्थयम्

18. 'थ'वर्णः कस्मिन् वर्गे अस्ति?

*A.* कवर्गे

*B.* चवर्गे

*C.* टवर्गे

*D.* तवर्गे

19. तालव्यध्वनिः अस्ति-

*A.* ग

*B.* प

*C.* झ

*D.* ड

20. 'व'इत्यस्य वर्णमाला नाम अस्ति-

*A.* ऊष्मः

*B.* टवर्गीयः

*C.* कण्ठ्यः

*D.* अन्तःस्थः

21. 'तनया' इति पर्यायपदम् कस्य अस्ति?

*A.* महिलायाः

*B.* गङ्गायाः

*C.* देहस्य

*D.* सुतायाः

22. सप्तमं कारकं अस्ति -

*A.* सम्प्रदानम्

*B.* अपादानम्

*C.* अधिकरणम्

*D.* कर्म

23. अनुचितविभक्तियुक्तं वाक्यं चिनुत–

*A.* नीतायै स्वस्ति

*B.* अग्नो स्वाहा

*C.* अलं विवादेन

*D.* भानवे नमः

24. 'यत्र,ते,अधुना,अहम्,हि,इतः,तत्,एव,चेत्' एतेषु कति पदानि अव्ययानि न सन्ति?

*A.* एकम्

*B.* द्वे

*C.* त्रीणि

*D.* चत्वारि

25. 'चतुर्थी' विभक्तिरस्मिन् पदे नास्ति -

*A.* सूनवे

*B.* हराय

*C.* मत्या

*D.* स्वस्तये

26. 'हर्तृ' शब्दस्य षष्ठी-एकवचनम् अस्ति-

*A.* हर्तुः

*B.* हर्तृः

*C.* हर्तरि

*D.* हर्त्रा

27. 'पार्वती' शब्दस्य षष्ठ्येकवचनं भवति-

*A.* पार्वतये

*B.* पार्वत्यै

*C.* पार्वत्याः

*D.* पार्वत्याम्

28. 'अम्बु'शब्दस्य पञ्चम्येकवचनं भवति-

*A.* अम्बुनि

*B.* अम्बुने

*C.* अम्बुनोः

*D.* अम्बुनः

29. 'एतद्' शब्दस्य पुंलिङ्गे चतुर्थी-एकवचनम्?

*A.* एतेन

*B.* एतस्यै

*C.* एतया

*D.* एतस्मै

30. 'किम्' शब्दस्य नपुंसकलिङ्गे पञ्चमी-एकवचनम् भवति?

*A.* किमः

*B.* कस्मात्

*C.* कस्मिन्

*D.* कस्याम्

31. 'कृ'धातोः लट्लकारे उ.पु.बहुवचने रूपम् -

*A.* करोमि

*B.* कुर्वः

*C.* कुर्मः

*D.* कुरुमः

32. 'इष्' धातोः लोट्लकारे प्र.पु.द्विवचने रूपम् -

*A.* इच्छताम्

*B.* ऐच्छत्

*C.* इच्छन्तु

*D.* इच्छेत्

33. 'दृश्'धातोः लङ्लकारे मध्यम-द्विवचने रूपम् -

*A.* अदृश्यतम्

*B.* अपश्याम

*C.* अपश्यतम्

*D.* अपश्यम्

34. 'स्था'धातोः विधिलिङ्लकारे उ.पु.एकवचने रूपम् -

*A.* स्थेयम्

*B.* तिष्ठतु

*C.* तिष्ठेः

*D.* तिष्ठेयम्

35. 'पा'धातोः लृट्लकारे म.पु.बहुवचने रूपम् -

*A.* पास्यथः

*B.* पिबन्ति

*C.* पास्यथ

*D.* पास्यामः

36. 'भवेः' पदस्य बहुवचने परिवर्तनम्-

*A.* भवेत

*B.* भवेयुः

*C.* भवेताम्

*D.* भवेम

37. 'तिष्ठतः' पदस्य लृट्लकारे परिवर्तनम्-

*A.* तिष्ठिष्यतः

*B.* स्थास्यतः

*C.* अतिष्ठताम्

*D.* तिष्ठेताम्

38. 'मुनिना' पदस्य सप्तमीविभक्तौ परिवर्तनम्-

*A.* मुनेः

*B.* मुनये

*C.* मुनौ

*D.* मुनीनाम्

39. 'इच्छतु' पदस्य मध्यमपुरुषे परिवर्तनम्-

*A.* इच्छ

*B.* इच्छामि

*C.* इच्छानि

*D.* इच्छाम

40. ‘तेजस्वी’ पदस्य स्त्रीलिङ्गं भवति-

*A.* तेजस्विन्

*B.* तेजस्विनी

*C.* तेजोवती

*D.* तेजोवान्

41. ‘मम गृहे _3_ खट्वाः सन्ति’ अत्र संख्यास्थाने विशेषणं स्यात्-

*A.* त्रयः

*B.* तिस्रः

*C.* त्रीणि

*D.* त्रीन्

42. कतमं शुद्धम् अस्ति?

*A.* चतस्रः व्याघ्राः

*B.* चत्वारः व्याघ्राः

*C.* चत्वारि व्याघ्राः

*D.* चतुर्भिः व्याघ्राः

43. ‘76’ अङ्कस्य संस्कृतनाम?

*A.* षट्सप्ततिः

*B.* सप्तषष्टिः

*C.* षट्सप्ततिंशत्

*D.* सप्तषष्टिंशत्

44. (17*4=?) चतुर्दशभिः षड्गुणितं भवति-

*A.* चतुरशीतिः

*B.* अष्टषष्टिः

*C.* अष्टचत्वारिंशत्

*D.* षडशीतिः

45. ‘पादोनसप्तवादनम्’ समयः अस्ति-

*A.* 9:15

*B.* 6:45

*C.* 8:45

*D.* 7:15

## ग. विशिष्टप्रश्नाः (HOTS)

46. ‘ऊर्वारुकम्’ पदमस्मिन् मन्त्रे अस्ति-

*A.* महामृत्युञ्जयमन्त्रे

*B.* भोजनमन्त्रे

*C.* गायत्रीमन्त्रे

*D.* शान्तिमन्त्रे

47. ‘परित्राणाय साधूनां...’ श्लोकस्य वक्ता अस्ति-

*A.* श्रीकृष्णः

*B.* अर्जुनः

*C.* व्यासः

*D.* संजयः

48. जीवविज्ञानशास्त्रम् वर्तमानकाले एतेन नाम्ना ख्यातः अस्ति-

*A.* Physics

*B.* Chemistry

*C.* Biology

*D.* Astronomy

49. 'हितोपदेशः' ग्रन्थस्य रचयिता अस्ति-

*A.* चाणक्यः

*B.* विष्णुशर्मा

*C.* कालिदासः

*D.* पण्डितराज जगन्नाथः

50. 'कपिलमुनि' लिखितं शास्त्रमस्ति-

*A.* अर्थशास्त्रम्

*B.* धर्मशास्त्रम्

*C.* योगशास्त्रम्

*D.* सांख्यशास्त्रम्

***

International
Olympiad Foundation
Certifying Talents Across World

# IFSaO

International Foundation
Sanskrit Olympiad

## ANSWER SHEET

| Question No. | Answer | Question No. | Answer |
|---|---|---|---|
| 1. | C | 26. | A |
| 2. | A | 27. | C |
| 3. | B | 28. | D |
| 4. | D | 29. | D |
| 5. | B | 30. | B |
| 6. | C | 31. | C |
| 7. | C | 32. | A |
| 8. | B | 33. | C |
| 9. | C | 34. | D |
| 10. | B | 35. | A |
| 11. | D | 36. | A |
| 12. | B | 37. | B |
| 13. | A | 38. | C |
| 14. | A | 39. | A |
| 15. | A | 40. | B |
| 16. | C | 41. | B |
| 17. | B | 42. | B |
| 18. | D | 43. | A |
| 19. | C | 44. | B |
| 20. | D | 45. | B |
| 21. | D | 46. | A |
| 22. | C | 47. | A |
| 23. | B | 48. | C |
| 24. | B | 49. | D |
| 25. | C | 50. | D |